# atharvashira upanishad

# અથર્વશિરોપનિષત્ શિવાથર્વશીર્ષં ચ

## Document Information

Text title : Atharvashira Upanishad

File name : atharvashira.itx

Category : atharvashIrSha, upanishhat, shiva

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 22/108; Atharva Veda, Shaiva Upanishad

Latest update : July 13, 1999, April 13, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# અથર્વશિરોપનિષત્ શિવાથર્વશીર્ષં ચ

અથર્વવેદીય શૈવ ઉપનિષત્ ॥

અથર્વશિરસામર્થમનર્થપ્રોચવાચકમ્ ।
સર્વાધારમનાધારં સ્વમાત્રત્રૈપદાક્ષરમ્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવા
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિ-
ર્વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ
સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ
સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ દેવા હ વૈ સ્વર્ગં લોકમાયંસ્તે રુદ્રમપૃચ્છન્કો
ભવાનિતિ । સોઽબ્રવીદહમેકઃ પ્રથમમાસં વર્તામિ ચ
ભવિશ્યામિ ચ નાન્યઃ કશ્ચિન્મત્તો વ્યતિરિક્ત ઇતિ ।
સોઽન્તરાદન્તરં પ્રાવિશત્ દિશશ્ચાન્તરં પ્રાવિશત્
સોઽહં નિત્યાનિત્યોઽહં વ્યક્તાવ્યક્તો બ્રહ્માબ્રહ્માહં પ્રાઞ્ચઃ
પ્રત્યઞ્ચોઽહં દક્ષિણાઞ્ચ ઉદઞ્ચોહં
અધશ્ચોર્ધ્વં ચાહં દિશશ્ચ પ્રતિદિશશ્ચાહં
પુમાનપુમાન્ સ્ત્રિયશ્ચાહં ગાયત્ર્યહં સાવિત્ર્યહં
ત્રિષ્ટુબ્જગત્યનુષ્ટુપ્ ચાહં છન્દોઽહં ગાર્હપત્યો
દક્ષિણાગ્નિરાહવનીયોઽહં સત્યોઽહં ગૌરહં
ગૌર્યહમૃગહં યજુરહં સામાહમથર્વાઙ્ગિરસોઽહં
જ્યેષ્ઠોઽહં શ્રેષ્ઠોઽહં વરિષ્ઠોઽહમાપોઽહં તેજોઽહં

ગુહ્યોહંઅરણ્યોઽહમક્ષરમહં ક્ષરમહં પુષ્કરમહં
પવિત્રમહમુગ્રં ચ મધ્યં ચ બહિશ્ચ
પુરસ્તાજ્જ્યોતિરિત્યહમેવ સર્વેભ્યો મામેવ સ સર્વઃ સમાં યો
માં વેદ સ સર્વાન્દેવાન્વેદ સર્વાંશ્ચ વેદાન્સાઙ્ગાનપિ
બ્રહ્મ બ્રાહ્મણૈશ્ચ ગાં ગોભિર્બ્રાહ્માણાન્બ્રાહ્મણેન
હવિર્હવિષા આયુરાયુષા સત્યેન સત્યં ધર્મેણ ધર્મં
તર્પયામિ સ્વેન તેજસા ।
તતો હ વૈ તે દેવા રુદ્રમપૃચ્છન્ તે દેવા રુદ્રમપશ્યન્ ।
તે દેવા રુદ્રમધ્યાયન્ તતો દેવા ઊર્ધ્વબાહવો રુદ્રં સ્તુવન્તિ ॥ ૧॥

ૐ યો વૈ રુદ્રઃ સ ભગવાન્યશ્ચ બ્રહ્મા તસ્મૈ વૈ નમોનમઃ ॥ ૧॥

યો વૈ રુદ્રઃ સ ભગવાન્ યશ્ચ વિષ્ણુસ્તસ્મૈ વૈ નમોનમઃ ॥ ૨॥

યો વૈ રુદ્રઃ સ ભગવાન્યશ્ચ સ્કન્દસ્તસ્મૈ વૈ નમોનમઃ ॥ ૩॥

યો વૈ રુદ્રઃ સ ભગવાન્યશ્ચેન્દ્રસ્તસ્મૈ વૈ નમોનમઃ ॥ ૪॥

યો વૈ રુદ્રઃ સ ભગવાન્યશ્ચાગ્નિસ્તસ્મૈ વૈ નમોનમઃ ॥ ૫॥

યો વૈ રુદ્રઃ સ ભગવાન્યશ્ચ વાયુસ્તસ્મૈ વૈ નમોનમઃ ॥ ૬॥

યો વૈ રુદ્રઃ સ ભગવાન્યશ્ચ સૂર્યસ્તસ્મૈ વૈ નમોનમઃ ॥ ૭॥

યો વૈ રુદ્રઃ સ ભગવાન્યશ્ચ સોમસ્તસ્મૈ વૈ નમોનમઃ ॥ ૮॥

યો વૈ રુદ્રઃ સ ભગવાન્યે ચાષ્ટૌ ગ્રહાસ્તસ્મૈ વૈ નમોનમઃ ॥ ૯॥

યો વૈ રુદ્રઃ સ ભગવાન્યે ચાષ્ટૌ પ્રતિગ્રહાસ્તસ્મૈ વૈ નમોનમઃ ॥ ૧૦॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચ ભૂસ્તસ્મૈ વૈ નમોનમઃ ॥ ૧૧॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચ ભુવસ્તસ્મૈ વૈ નમોનમઃ ॥ ૧૨॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચ સ્વસ્તસ્મૈ વૈ નમોનમઃ ॥ ૧૩॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચ મહસ્તસ્મૈ વૈ નમોનમઃ ॥ ૧૪॥

યો વૈ રુદ્રઃ સ ભગવાન્યા ચ પૃથિવી તસ્મૈ વૈ નમોનમઃ ॥ ૧૫॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચાન્તરિક્ષં તસ્મૈ વૈ નમોનમઃ ॥ ૧૬॥

યો વૈ રુદ્રઃ સ ભગવાન્યા ચ દ્યૌસ્તસ્મૈ વૈ નમોનમઃ ॥ ૧૭॥

યો વૈ રુદ્રઃ સ ભગવાન્યાશ્ચાપસ્તસ્મૈ વૈ નમોનમઃ ॥ ૧૮॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચ તેજસ્તસ્મૈ વૈ નમોનમઃ ॥ ૧૯॥

યો વૈ રુદ્રઃ સ ભગવાન્યશ્ચ કાલસ્તસ્મૈ વૈ નમોનમઃ ॥ ૨૦॥

યો વૈ રુદ્રઃ સ ભગવાન્યશ્ચ યમસ્તસ્મૈ વૈ નમોનમઃ ॥ ૨૧॥

યો વૈ રુદ્રઃ સ ભગવાન્યશ્ચ મૃત્યુસ્તસ્મૈ વૈ નમોનમઃ ॥ ૨૨॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચામૃતં તસ્મૈ વૈ નમોનમઃ ॥ ૨૩॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચાકાશં તસ્મૈ વૈ નમોનમઃ ॥ ૨૪॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચ વિશ્વં તસ્મૈ વૈ નમોનમઃ ॥ ૨૫॥

યો વૈ રુદ્રઃ સ ભગવાન્યાચ્ચ સ્થૂલં તસ્મૈ વૈ નમોનમઃ ॥ ૨૬॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચ સૂક્ષ્મં તસ્મૈ વૈ નમોનમઃ ॥ ૨૭॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચ શુક્લં તસ્મૈ નમોનમઃ ॥ ૨૮॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચ કૃષ્ણં તસ્મૈ વૈ નમોનમઃ ॥ ૨૯॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચ કૃત્સ્નં તસ્મૈ વૈ નમોનમઃ ॥ ૩૦॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચ સત્યં તસ્મૈ વૈ નમોનમઃ ॥ ૩૧॥

યો વૈ રુદ્રઃ સ ભગવાન્યચ્ચ સર્વં તસ્મૈ વૈ નમોનમઃ ॥ ૩૨॥ ॥ ૨॥

ભૂસ્તે આદિર્મધ્યં ભુવઃ સ્વસ્તે શીર્ષં વિશ્વરૂપોઽસિ બ્રહ્મૈકસ્ત્વં દ્વિધા
ત્રિધા વૃદ્ધિસ્તં શાન્તિસ્ત્વં પુષ્ટિસ્ત્વં હુતમહુતં દત્તમદત્તં
સર્વમસર્વં વિશ્વમવિશ્વં કૃતમકૃતં પરમપરં પરાયણં ચ ત્વમ્ ।
અપામ સોમમમૃતા અભૂમાગન્મ જ્યોતિરવિદામ દેવાન્ ।
કિં નૂનમસ્માન્કૃણવદરાતિઃ કિમુ ધૂર્તિરમૃતં માર્ત્યસ્ય ।
સોમસૂર્યપુરસ્તાત્ સૂક્ષ્મઃ પુરુષઃ ।
સર્વં જગદ્ધિતં વા એતદક્ષરં પ્રાજાપત્યં સૂક્ષ્મં
સૌમ્યં પુરુષં ગ્રાહ્યમગ્રાહ્યેણ ભાવં ભાવેન સૌમ્યં
સૌમ્યેન સૂક્ષ્મં સૂક્ષ્મેણ વાયવ્યં વાયવ્યેન ગ્રસતિ સ્વેન
તેજસા તસ્માદુપસંહર્ત્રે મહાગ્રાસાય વૈ નમો નમઃ ।
હૃદિસ્થા દેવતાઃ સર્વા હૃદિ પ્રાણાઃ પ્રતિષ્ઠિતાઃ ।
હૃદિ ત્વમસિ યો નિત્યં તિસ્રો માત્રાઃ પરસ્તુ સઃ । તસ્યોત્તરતઃ શિરો

દક્ષિણતઃ પાદૌ ય ઉત્તરતઃ સ ઓઙ્કારઃ ય ઓઙ્કારઃ સ પ્રણવઃ
યઃ પ્રણવઃ સ સર્વવ્યાપી યઃ સર્વવ્યાપી સોઽનન્તઃ
યોઽનન્તસ્તત્તારં યત્તારં તત્સૂક્ષ્મં તચ્છુક્લં
યચ્છુક્લં તદ્વૈદ્યુતં યદ્વૈદ્યુતં તત્પરં બ્રહ્મ યત્પરં
બ્રહ્મ સ એકઃ ય એકઃ સ રુદ્રઃ ય રુદ્રઃ યો રુદ્રઃ સ ઈશાનઃ ય
ઈશાનઃ સ ભગવાન્ મહેશ્વરઃ ॥ ૩॥

અથ કસ્માદુચ્યત ઓઙ્કારો યસ્માદુચ્ચાર્યમાણ એવ
પ્રાણાનૂર્ધ્વમુત્ક્રામયતિ તસ્માદુચ્યતે ઓઙ્કારઃ ।
અથ કસ્માદુચ્યતે પ્રણવઃ યસ્માદુચ્ચાર્યમાણ એવ
ઋગ્યજુઃસામાથર્વાઙ્ગિરસં બ્રહ્મ બ્રાહ્મણેભ્યઃ પ્રણામયતિ
નામયતિ ચ તસ્માદુચ્યતે પ્રણવઃ ।
અથ કસ્માદુચ્યતે સર્વવ્યાપી યસ્માદુચ્ચાર્યમાણ એવ
સર્વાંલોકાન્વ્યાપ્નોતિ સ્નેહો યથા પલલપિણ્ડમિવ
શાન્તરૂપમોતપ્રોતમનુપ્રાપ્તો વ્યતિષક્તશ્ચ તસ્માદુચ્યતે સર્વવ્યાપી ।
અથ કસ્માદુચ્યતેઽનન્તો યસ્માદુચ્ચાર્યમાણ એવ
તિર્યગૂર્ધ્વમધસ્તાચ્ચાસ્યાન્તો નોપલભ્યતે તસ્માદુચ્યતેઽનન્તઃ ।
અથ કસ્માદુચ્યતે તારં યસ્માદુચ્ચારમાણ એવ
ગર્ભજન્મવ્યાધિજરામરણસંસારમહાભયાત્તારયતિ ત્રાયતે
ચ તસ્માદુચ્યતે તારમ્ ।
અથ કસ્માદુચ્યતે શુક્લં યસ્માદુચ્ચાર્યમાણ એવ ક્લન્દતે
ક્લામયતિ ચ તસ્માદુચ્યતે શુક્લમ્ ।
અથ કસ્માદુચ્યતે સૂક્ષ્મં યસ્માદુચ્ચાર્યમાણ એવ સૂક્ષ્મો ભૂત્વા
શરીરાણ્યધિતિષ્ઠતિ સર્વાણિ ચાઙ્ગાન્યમિમૃશતિ તસ્માદુચ્યતે સૂક્ષ્મમ્ ।
અથ કસ્માદુચ્યતે વૈદ્યુતં યસ્માદુચ્ચાર્યમાણ એવ વ્યક્તે
મહતિ તમસિ દ્યોતયતિ તસ્માદુચ્યતે વૈદ્યુતમ્ ।
અથ કસ્માદુચ્યતે પરં બ્રહ્મ યસ્માત્પરમપરં પરાયણં ચ
બૃહદ્બૃહત્યા બૃંહયતિ તસ્માદુચ્યતે પરં બ્રહ્મ ।
અથ કસ્માદુચ્યતે એકઃ યઃ સર્વાન્પ્રાણાન્સંભક્ષ્ય
સંભક્ષણેનાજઃ સંસૃજતિ વિસૃજતિ તીર્થમેકે વ્રજન્તિ
તીર્થમેકે દક્ષિણાઃ પ્રત્યઞ્ચ ઉદઞ્ચઃ
પ્રાઞ્ચોઽભિવ્રજન્ત્યેકે તેષાં સર્વેષામિહ સદ્ગતિઃ ।

સાકં સ એકો ભૂતશ્ચરતિ પ્રજાનાં તસ્માદુચ્યત એકઃ ।
અથ કસ્માદુચ્યતે રુદ્રઃ યસ્માદૃષિભિર્નાન્યૈર્ભક્તૈર્દ્રુતમસ્ય
રૂપમુપલભ્યતે તસ્માદુચ્યતે રુદ્રઃ ।
અથ કસ્માદુચ્યતે ઈશાનઃ યઃ સર્વાન્દેવાનીશતે
ઈશાનીભિર્જનનીભિશ્ચ પરમશક્તિભિઃ ।
અભિત્વા શૂર ણો નુમો દુગ્ધા ઇવ ધેનવઃ । ઈશાનમસ્ય જગતઃ
સ્વર્દૃશમીશાનમિન્દ્ર તસ્થિષ ઇતિ તસ્માદુચ્યતે ઈશાનઃ ।
અથ કસ્માદુચ્યતે ભગવાન્મહેશ્વરઃ યસ્માદ્ભક્તા જ્ઞાનેન
ભજન્ત્યનુગૃહ્ણાતિ ચ વાચં સંસૃજતિ વિસૃજતિ ચ
સર્વાન્ભાવાન્પરિત્યજ્યાત્મજ્ઞાનેન યોગેશ્વૈર્યેણ મહતિ મહીયતે
તસ્માદુચ્યતે ભગવાન્મહેશ્વરઃ । તદેતદ્રુદ્રચરિતમ્ ॥ ૪॥

એકો હ દેવઃ પ્રદિશો નુ સર્વાઃ પૂર્વો હ જાતઃ સ ઉ ગર્ભે અન્તઃ ।
સ એવ જાતઃ જનિષ્યમાણઃ પ્રત્યઙ્જનાસ્તિષ્ઠતિ સર્વતોમુખઃ ।
એકો રુદ્રો ન દ્વિતીયાય તસ્મૈ ય ઇમાંલ્લોકાનીશત ઈશનીભિઃ ।
પ્રત્યઙ્જનાસ્તિષ્ઠતિ સંચુકોચાન્તકાલે સંસૃજ્ય વિશ્વા
ભુવનાનિ ગોપ્તા ।
યો યોનિં યોનિમધિતિષ્ઠતિત્યેકો યેનેદં સર્વં વિચરતિ સર્વમ્ ।
તમીશાનં પુરુષં દેવમીડ્યં નિચાય્યેમાં શાન્તિમત્યન્તમેતિ ।
ક્ષમાં હિત્વા હેતુજાલાસ્ય મૂલં બુદ્ધ્યા સઞ્ચિતં સ્થાપયિત્વા તુ રુદ્રે ।
રુદ્રમેકત્વમાહુઃ શાશ્વતં વૈ પુરાણમિષમૂર્જેણ
પશવોઽનુનામયન્તં મૃત્યુપાશાન્ ।
તદેતેનાત્મન્નેતેનાર્ધચતુર્થેન માત્રેણ શાન્તિં સંસૃજન્તિ
પશુપાશવિમોક્ષણમ્ ।
યા સા પ્રથમા માત્રા બ્રહ્મદેવત્યા રક્તા વર્ણેન યસ્તાં
ધ્યાયતે નિત્યં સ ગચ્છેત્બ્રહ્મપદમ્ ।
યા સા દ્વિતીયા માત્રા વિષ્ણુદેવત્યા કૃષ્ણા વર્ણેન
યસ્તાં ધ્યાયતે નિત્યં સ ગચ્છેદ્વૈષ્ણવં પદમ્ । યા સા
તૃતીયા માત્રા ઈશાનદેવત્યા કપિલા વર્ણેન યસ્તાં
ધ્યાયતે નિત્યં સ ગચ્છેદૈશાનં પદમ્ ।
યા સાર્ધચતુર્થી માત્રા સર્વદેવત્યાઽવ્યક્તીભૂતા ખં
વિચરતિ શુદ્ધા સ્ફટિકસન્નિભા વર્ણેન યસ્તાં ધ્યાયતે

નિત્યં સ ગચ્છેત્પદમનામયમ્ ।
તદેતદુપાસીત મુનયો વાગ્વદન્તિ ન તસ્ય ગ્રહણમયં પન્થા
વિહિત ઉત્તરેણ યેન દેવા યાન્તિ યેન પિતરો યેન ઋષયઃ
પરમપરં પરાયણં ચેતિ ।
વાલાગ્રમાત્રં હૃદયસ્ય મધ્યે વિશ્વં દેવં જાતરૂપં વરેણ્યમ્ ।
તમાત્મસ્થં યેનુ પશ્યન્તિ ધીરાસ્તેષાં શાન્તિર્ભવતિ નેતરેષામ્ ।
યસ્મિન્ક્રોધં યાં ચ તૃષ્ણાં ક્ષમાં ચાક્ષમાં હિત્વા
હેતુજાલસ્ય મૂલમ્ ।
બુદ્ધ્યા સંચિતં સ્થાપયિત્વા તુ રુદ્રે રુદ્રમેકત્વમાહુઃ ।
રુદ્રો હિ શાશ્વતેન વૈ પુરાણેનેષમૂર્જેણ તપસા નિયન્તા ।
અગ્નિરિતિ ભસ્મ વાયુરિતિ ભસ્મ જલમિતિ ભસ્મ સ્થલમિતિ ભસ્મ
વ્યોમેતિ ભસ્મ સર્વંહ વા ઇદં ભસ્મ મન એતાનિ
ચક્ષૂંષિ યસ્માદ્વ્રતમિદં પાશુપતં યદ્ભસ્મ નાઙ્ગાનિ
સંસ્પૃશેત્તસ્માદ્બ્રહ્મ તદેતત્પાશુપતં પશુપાશ વિમોક્ષણાય ॥ ૫॥

યોઽગ્નૌ રુદ્રો યોઽપ્સ્વન્તર્ય ઓષધીર્વીરુધ આવિવેશ । ય ઇમા
વિશ્વા ભુવનાનિ ચક્લૃપે તસ્મૈ રુદ્રાય નમોઽસ્ત્વગ્નયે ।
યો રુદ્રોઽગ્નૌ યો રુદ્રોઽપ્સ્વન્તર્યો ઓષધીર્વીરુધ આવિવેશ ।
યો રુદ્ર ઇમા વિશ્વા ભુવનાનિ ચક્લૃપે તસ્મૈ રુદ્રાય નમોનમઃ ।
યો રુદ્રોઽપ્સુ યો રુદ્ર ઓષધીષુ યો રુદ્રો વનસ્પતિષુ । યેન
રુદ્રેણ જગદૂર્ધ્વંધારિતં પૃથિવી દ્વિધા ત્રિધા ધર્તા
ધારિતા નાગા યેઽન્તરિક્ષે તસ્મૈ રુદ્રાય વૈ નમોનમઃ ।
મૂર્ધાનમસ્ય સંસેવ્યાપ્યથર્વા હૃદયં ચ યત્ ।
મસ્તિષ્કાદૂર્ધ્વં પ્રેરયત્યવમાનોઽધિશીર્ષતઃ ।
તદ્વા અથર્વણઃ શિરો દેવકોશઃ સમુજ્ઝિતઃ ।
તત્પ્રાણોઽભિરક્ષતિ શિરોઽન્તમથો મનઃ ।
ન ચ દિવો દેવજનેન ગુપ્તા ન ચાન્તરિક્ષાણિ ન ચ ભૂમ ઇમાઃ ।
યસ્મિન્નિદં સર્વમોતપ્રોતં તસ્માદન્યન્ન પરં કિઞ્ચનાસ્તિ ।
ન તસ્માત્પૂર્વં ન પરં તદસ્તિ ન ભૂતં નોત ભવ્યં યદાસીત્ ।
સહસ્રપાદેકમૂર્ધ્ના વ્યાપ્તં સ એવેદમાવરીવર્તિ ભૂતમ્ ।
અક્ષરાત્સંજાયતે કાલઃ કાલાદ્વ્યાપક ઉચ્યતે ।
વ્યાપકો હિ ભગવાન્રુદ્રો ભોગાયમનો યદા શેતે રુદ્રસ્તદા સંહાર્યતે પ્રજાઃ ।

ઉચ્છ્વાસિતે તમો ભવતિ તમસ આપોઽપ્સ્વઙ્ગુલ્યા મથિતે
મથિતં શિશિરે શિશિરં મથ્યમાનં ફેનં ભવતિ ફેનાદણ્ડં
ભવત્યણ્ડાદ્બ્રહ્મા ભવતિ બ્રહ્મણો વાયુઃ વાયોરોઙ્કારઃ
ૐકારાત્સાવિત્રી સાવિત્ર્યા ગાયત્રી ગાયત્ર્યા લોકા ભવન્તિ ।
અર્ચયન્તિ તપઃ સત્યં મધુ ક્ષરન્તિ યદ્ભુવમ્ ।
એતદ્ધિ પરમં તપઃ ।
આપોઽજ્યોતી રસોઽમૃતં બ્રહ્મ ભૂર્ભુવઃ સ્વરો નમ ઇતિ ॥ ૬॥

ય ઇદમથર્વશિરો બ્રાહ્મણોઽધીતે અશ્રોત્રિયઃ શ્રોત્રિયો ભવતિ
અનુપનીત ઉપનીતો ભવતિ સોઽગ્નિપૂતો ભવતિ સ વાયુપૂતો
ભવતિ સ સૂર્યપૂતો ભવતિ સ સર્વૈર્દેવૈર્જ્ઞાતો ભવતિ સ
સર્વૈર્વેદૈરનુધ્યાતો ભવતિ સ સર્વેષુ તીર્થેષુ સ્નાતો
ભવતિ તેન સર્વૈઃ ક્રતુભિરિષ્ટં ભવતિ ગાયત્ર્યાઃ
ષષ્ટિસહસ્રાણિ જપ્તાનિ ભવન્તિ ઇતિહાસપુરાણાનાં
રુદ્રાણાં શતસહસ્રાણિ જપ્તાનિ ભવન્તિ ।
પ્રણવાનામયુતં જપ્તં ભવતિ । સ ચક્ષુષઃ પઙ્ક્તિં પુનાતિ ।
આ સપ્તમાત્પુરુષયુગાન્પુનાતીત્યાહ ભગવાનથર્વશિરઃ
સકૃજ્જપ્ત્વૈવ શુચિઃ સ પૂતઃ કર્મણ્યો ભવતિ ।
દ્વિતીયં જપ્ત્વા ગણાધિપત્યમવાપ્નોતિ ।
તૃતીયં જપ્ત્વૈવમેવાનુપ્રવિશત્યોં સત્યમોં સત્યમોં સત્યમ્ ॥ ૭॥

ૐ ભદ્રં કર્ણેભિરિતિ શાન્તિઃ ॥

॥ ઇત્યથર્વશિરોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*atharvashira upanishad*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*